# संस्कृतवार्ता:

**दिनाङ्क: 01.06.2026** **प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-म्यांमार**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां म्यान्मार-देशस्य राष्ट्रपतिना यू मिन् आङ्ग् ह्लाईङ्ग इत्यनेन सह चर्चां करिष्यति। उभयोः देशयोः मध्ये ऐतिहासिकानां सभ्यतानां च सम्बन्धान् इतोपि सुदृढीकरणाय वार्तालापः भविष्यति। वार्तालापावधौ म्यान्मार-भारतयोः मध्ये सुरक्षा-सम्पर्कौ च समेत्य सम्पूर्णेषु विषयेषु चर्चाः भविष्यन्ति। राष्ट्रिय-सुरक्षा-परामर्शदः अजित-डोभालः गतरात्रौ दिल्ल्यां अतिथि-गणमान्यैः सह मेलनं विहितवान्। अवधेयं यत् म्यान्मार्-देशस्य राष्ट्रपतिः शनिवासरे भारतस्य पञ्चदिवसीय यात्रायां बिहारस्य गया-नगरं प्राप्तवान् आसीत्। म्यान्मार्-देशस्य राष्ट्रपतेः भारतस्य आधिकारिकयात्रायाः कारणात् उभयोः देशयोः मध्ये बहु-पक्षीय-सम्बन्धः इतोऽपि सुदृढः भविष्यति इत्यपेक्षा अस्ति।

**मनकीबात-प्रधानमन्त्री**

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रकृतिसंरक्षणे, स्थानीयसमाह्वानानां निराकरणे, अन्यसामाजिक-कार्येषु च, तेषां प्रेरक-उपक्रमाणां, उपलब्धीनां च विषये अनेकेषां नागरिकाणां उत्कृष्ट-योगदानाय प्रशंसाम् अकरोत्। आकाशवाण्याः स्वकीये मासिककार्यक्रमे मन की बात इत्यनेन कार्यक्रमेण राष्ट्रम् अभिसंबोधयन्, श्रीमोदी

झारखण्ड-राज्यस्य राँची-नगरे आयोजिते राष्ट्रिय-वरिष्ठ-ऐथ्लेटिक्स-फ़ेडरेशन-स्पर्धायां उदयोन्मुख-क्रीडकानां उत्कृष्ट-प्रदर्शनस्य प्रशंसाम् अकरोत्। प्रवर्तमानायाः उष्णतरङ्गस्य स्थितिं प्रति चिन्तां प्रकटयन्, प्रधानमन्त्रिणा जनान् अधिकृतान् उपदेशान् अनुसृत्य, सुरक्षितं स्थातुं पूर्वसूचनानुसारं कार्यं कर्तुं च उद्बुद्धवान्।

**पश्चिमबङ्गाल:मन्त्रिमण्डलम्**

पश्चिमबङ्गालराज्यस्य मुख्यमन्त्री सुभेन्दु अधिकारी अद्य स्वमन्त्रिमण्डलस्य विस्तारं करिष्यति। पञ्चत्रिंशतिः नूतनाः मन्त्रिणः मन्त्रिमण्डले समाविष्टाः भविष्यन्ति। शपथग्रहणम् प्रातः एकादशवादने लोकभवने भविष्यति। नूतनेन समावेशेन सुभेन्दु-प्रशासने महत्त्वपूर्णरूपेण संवर्धनं भविष्यति, येन मई-मासस्य नवमे दिनाङ्के पञ्चमन्त्रिभिः सह कार्यभारं स्वीकृतम् आसीत्। अनेन विस्तारेण राज्यमन्त्रिमण्डलस्य मन्त्रिणां कुलसङ्ख्या एकचत्वारिंशत् यावत् वर्धिता भविष्यति।

**निर्वाचनम्**

निर्वाचन-आयोगेन दश-राज्याणां चतुर्विंशतिः राज्यसभा-सदस्यानां द्विवार्षिक-निर्वाचनस्य कार्यक्रमस्य घोषणा अद्य क्रियते। भूतपूर्वः प्रधानमन्त्री एच्. डी. देवगौडा, केन्द्रीयमन्त्रिणौ जॉर्ज् कुरियन् तथा रवनीत् सिंहः च तेषु सदस्येषु अन्तर्भवन्ति। आन्ध्रप्रदेशे, गुजराते तथा कर्णाटके प्रत्येकस्मिन् राज्ये चत्वारि आसनानि सन्ति। राजस्थाने तथा मध्यप्रदेशे प्रत्येकस्मिन् राज्ये त्रीणि आसनानि सन्ति। झारखण्डे द्वे आसने स्तः। मणिपुरे, मेघालये, अरुणाचलप्रदेशे तथा मिजोरामे प्रत्येकस्मिन् राज्ये एकैकम् आसनं रिक्तं अस्ति । आयोगस्य

अनुसारं जूनमासस्य अष्टादश-दिनाङ्के मतदानं भविष्यति, मतगणना अपि तस्मिन्नेव दिने भविष्यति। महाराष्ट्रस्य तमिलनाडुराज्यस्य ओडिशाराज्यस्य च प्रत्येकस्य एकस्य आसनस्य कृते राज्यसभायाः उप निर्वाचनस्य कार्यक्रमस्य अपि आयोगेन घोषणा क्रियते। एतद् निर्वाचनम् अपि अष्टादश-दिनाङ्के भविष्यति।

## सुमन कल्याणपुर

एकोननवति वर्षीया-प्रख्यातगायिकायाः सुमनकल्याणपुरस्य मुम्बई-नगरे स्वनिवासस्थाने मृत्युः अभवत्। पञ्चाशदधिक ऊनविंशतिशततमात् वर्षात् सप्तत्यधिक ऊनविंशतिशत तमं वर्षं यावत् चलच्चित्रसङ्गीतस्य स्वर्णयुगे नैकासु भारतीयभाषासु कृतकार्याणां कृते एषा वयोवृद्धगायिका प्रसिद्धा आसीत्। महाराष्ट्रस्य राज्यपालेन, मुख्यमन्त्रिणा, उपमुख्यमन्त्रिभ्याम्, केन्द्रीयमन्त्रिणा नितिन् गड्करिणा च सुमन कल्याणपुरस्य निधने शोकं प्रकटितम्।

## आईपीएल

अपि च आई पी एल क्रिकेट्-क्रीडायां, गत रात्रौ अहमदाबादस्य नरेन्द्र मोदी-क्रीडाङ्गणे अन्तिम-स्पर्धायां गुजरात्-टायटन्स दलं पञ्च-स्तोभैः पराजित्य, गतविजेतृदलेन रायल्-चैलॅञ्जर्स्-बेङ्गलुरु इत्यनेन अस्य वर्षस्यापि श्रृंखला विजिता।

**।।इति वार्ताः।।**